संस्कृतवार्ता:

दिनाङ्क : 02/02/2025 सायम् - 06:20

आदौ मुख्यवार्ताः

- दिल्ली-विधानसभा निर्वाचनार्थं दिनद्वयं अवशिष्टम्। अत्रान्तरे मतदातृन्-आक्रष्टुं राजनैतिक-दलानि जवीयगत्या प्रयासरतानि सन्ति।
- कनाडादेशस्य प्रधानमन्त्री जस्टिन् ट्रुडो अमेरिकादेशात् कनाडादेशे आगतेषु पञ्चपञ्चाशदधिकैक-शत-बिलियन-डॉलरमितेषु वस्तुषु पञ्चविंशति-प्रतिशतमितं शुल्कं स्थापयितुं घोषणां कृतवान्। चीन-मैक्सिकोदेशौ स्वीय आयातेषु शुल्कं आरोपितार्थम् अमेरिकादेशस्य निर्णयस्य विरोधम् अकुरुताम्।
- अशेषे हि देशे अद्य बसन्तपञ्चम्याः सरस्वतीपूजायाश्च पर्व हर्षोल्लासेन आमान्यते। राष्ट्रपति-पदासीना द्रौपदी मुर्मुः प्रधानमन्त्री नरेन्द्रमोदी च अवसरेऽस्मिन् देशवासिभ्यः शुभकामनां प्रकल्पितवन्तौ।
- अपि च,
- भारतेन मलेशियाया: कुआला-लम्पुरस्थले बायूमास-ओवल इत्यत्र निर्णायकस्पर्धायां दक्षिणाफ्रीका-दलं नवस्तोभै: पराजितम्।

दिल्ली-प्रचाराभियानाम्

दिल्ली-विधानसभा निर्वाचनार्थं दिनद्वयं अवशिष्टम्। अत्रान्तरे मतदातृन्-आक्रष्टुं राजनैतिक-दलानि जवीयगत्या प्रयासरतानि सन्ति। आम-आदमी-पार्टी-भाजपा-कांग्रेसदलानां प्रमुखनेतार: स्व-प्रत्याशिनां समर्थनाय निरन्तरं जनसभा:, पथप्रदर्शनञ्च कुर्वन्ति। वरिष्ठ-भाजपानेता प्रधानमन्त्री च नरेन्द्र-मोदी अद्य अपराह्णे आर.के.पुरम. इत्यत्र एकां जनसभां सम्बोधितवान्। दलस्य नेता केन्द्रीयमन्त्री च राजनाथ-सिंह: राजेन्द्रनगर-चांदनीचौक-लक्ष्मीनगरेषु जनसभा: करिष्यति। अत्रान्तरे आम-आदमी-पाटीर्ति दलस्य संयोजक: अरविन्द-केजरीवाल: मुख्य-निर्वाचनायुक्ताय पत्रं विलिख्य भाजपाकार्यकर्तृणां दिल्ली-आरक्षि-बलाधिकारिणां च विरुध्य राजनैतिकाधिनियमस्य अन्तर्गतं कार्यजातस्य याचनां कृतवान्। कांग्रेस-दलाध्यक्ष: मल्लिकार्जुन-खड्गे अपि मुस्तफाबाद-निर्वाचनक्षेत्रे एकां जनसभां सम्बोधयिष्यति। कांग्रेसदलस्य वरिष्ठनेता राहुल-गान्धि प्रियंका-गान्धि च राष्ट्रिय-राजधान्या: विभिन्न-निर्वाचनक्षेत्रेषु जनसभा: करिष्यत:। सप्तति-सदस्यात्मिकायै दिल्ली-विधानसभायै

निर्वाचनम् आगामि-बुधवासरे भविष्यति अथ मतगणना च अस्मिन् मासे अष्टमे दिनाङ्के भविष्यति।

प्रधानमन्त्री-महाकुम्भ:

प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् भारत-इण्डोनेशिया-देशयो: सम्बन्ध: न केवल भू-राजनीतिकपर: अपितु सहस्रवर्षप्राचीन: अस्ति। इण्डोनेशियादेशस्य जकार्तानगरे 'श्रीसनातन-धर्म-आलयम' इत्येतस्य 'महाकुम्भभिषेकम' इत्यस्य अवधौ स्वीय सम्बोधने श्रीमोदिना उक्तं यत् भारत-इण्डोनेशिया-देशौ संस्कृति-सभ्यता-आध्यात्मिकतानां च माध्यमेन सम्बद्धौ स्त:। प्रधानमन्त्री अवदत् यत् यदा-कदापि कश्चन भारतीय: इण्डोनेशियाया: 'प्रम्बनन मन्दिर' सदृशे देवालये गच्छति, तर्हि तं काशी-केदारनाथयो: स्मरणं भवति।

(PM KUSAMBHI ShEKA – 23 SECS)

विराम:

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।

अथ महाकुम्भवार्ता:

मोंटाज-ओपन

रेलवे-महाकुम्भ:

रेलवे-विभाग: श्व: बसन्तपञ्चम्यां तृतीय-अमृत-स्नानावसरे प्रयागराजस्य विभिन्न-रेलवे-स्थानकेभ्य: चतुश्शताधिकानि महाकुम्भ-विशेष-रेलयानानि प्रचालयिष्यति। अनेन लक्षाधिका: तीर्थयात्रिण: निर्बाधतया यात्रां कर्तुं शक्ष्यन्ति।

आकाशवाणी-हर कण्ठ में भारत

संस्कृति-मन्त्रालयेन आकाशवाण्या: सहयोगेन अद्य दिल्लीस्थे आकाशवाणी-भवने विशेष-शास्त्रीय-संगीत-कार्यक्रमस्य 'हर कण्ठ में भारत' इत्यस्य शुभारम्भो विहित: । कार्यक्रमोऽयं अद्यारभ्य फरवरीमासस्य षोडश-दिनाङ्कं यावत् प्रतिदिनं प्रात: सार्ध-नववादनादारभ्य सार्ध-दशवादनं यावत् एकविंशति-आकाशवाणी-केन्द्रेषु सजीव-प्रसारयिष्यते। अस्य कार्यक्रमस्य उद्घाटनं संस्कृति-मन्त्रालयस्य सचिव: अरूणीश-चावला एवं प्रसारभारत्या: मुख्य-कार्यकारि-अधिकारी गौरव-द्विवेदी इत्येतौ विहितवन्तौ। अत्रावसरे आकाशवाण्या: महानिदेशिका डा. प्रज्ञा पालीवाल-गौड् इत्येषापि उपस्थिता आसीत्। संस्कृति-मन्त्रालयस्य सचिवेन अरूणीश-चावला इत्यमुना प्रोक्तं यत् 'हर कण्ठ में भारत' इत्येष: कार्यक्रम: भारतस्य युवा-कलाकारेभ्य: देशस्य समक्षे स्वप्रतिभा-प्रदर्शनार्थं मञ्चं प्रदास्यति।

1400-(बाइट-अरूणेश-चावला) -

प्रसारभारत्या: मुख्य-कार्यकारी-अधिकारिणा गौरव द्विवेदी इत्यमुना प्रोक्तं यत् अनेन पदक्षेपेण आकाशवाण्या: एकविंशति: केन्द्रेभ्य: षड्शताधिका: कलाकारा: स्वप्रतिभा-प्रदर्शनार्थं अवसरं प्राप्स्यन्ति। तेन जना: कार्यक्रम-श्रवणार्थं स्वप्रतिक्रिया-प्रदानार्थञ्च प्रोत्साहिता:।

1400- (बाइट-गौरव सीईओ)-

आकाशवाण्या: महानिदेशिकया डॉ. गौड इत्यनया अस्य पदक्षेपस्य प्रशंसा कुर्वत्या कथितं यत् अयं संस्कृति-मन्त्रालयस्य अपूर्व-प्रयास: वर्तते। अनेन न केवलं कलाकारा: अपितु आकाशवाण्या: श्रोतार: अपि वर्द्धिष्यन्ति।

1400 (डीजी-डॉ.-प्रज्ञा)-

<u>प्रतिक्रिया-आयव्ययका:</u>

बिहारे सर्वैरवपि वर्गै: केन्द्रिय-आयव्ययके विहित-प्रावधानानां प्रशंसा कृता। उद्योगादारभ्य कृषिं यावत् सर्वविध-क्षेत्रीय-जनै: कथितं यत् अस्य वर्षस्य आयव्ययके बिहारस्य प्रमुखोल्लेख: विहित:।

(1400-वॉक्स-पॉप-धर्मेन्द्र - बिहार)

रक्षा एवं रेल आयव्ययका:

सर्वकारेण पञ्चविंशत्यधिक-द्विसहस्रतमस्य षड्विंशति-वित्तवर्षस्य च केन्द्रिय-आयव्ययके एकादश-दशमलव-एकविंशति लक्षकोटि-परिमितात्मकस्य पूंजीगत-परिव्ययस्य लक्ष्यं संस्थापितम्1 रक्षा-रेलवे इत्यनयो: कृते उल्लेखनीय-आयव्ययकस्य आवंटनेन सह रक्षार्थं एकाशीति-सहस्रकोट्यधिक-षड्लक्षमितात्मक रूप्यकाणि आवंटितानि। एकस्मिन् वर्तमान-वित्तवर्षात् नव-दशमलव-त्रिपञ्चाशत्-प्रतिशतं यावत् वृद्धि: वर्तते। रेलवे-सूचना-प्रसारणमन्त्रिणा अश्विनी वैष्णवेन प्रोदीरितं यत् पञ्चविंशत्युत्तर-द्विसहस्रतमस्य केन्द्रिय-आयव्ययकेन विकसित-भारताय दिशानिर्देश: प्रकल्पित:।

अमेरिका-कनाडा-चीन

अमेरिकादेशस्य-राष्ट्रपतिना डोनाल्ड् ट्रम्प इत्यनेन-मैक्सिको-कनाडा-चीन-देशेभ्य: आयाते शुल्कम् आरोपितम्। राष्ट्रपतिना गतरात्रौ त्रिषु कार्यकारि-आदेशेषु हस्ताक्षरं कृतम्। मैक्सिको-देशात् आयाते पञ्चविंशति-प्रतिशतमितं, कनाडा-देशात् आयाते पञ्चविंशति-प्रतिशतमितम्, ऊर्जास्रोतेषु दशप्रतिशतमितं च शुल्कम् आरोपितम्। तत्रैव, चीनदेशात्-आयाते अतिरिक्तं दशप्रतिशतमितं यावत् शुल्कं स्थापयितुम् अनुमोदितम्। अनन्तरं प्रत्युत्तरे कनाडादेशस्य प्रधानमन्त्री जस्टिन् ट्रुडो अमेरिकादेशात् कनाडादेशे आगतेषु पञ्चपञ्चाशदधिकैक-शत-बिलियनडॉलर-मितेषु वस्तुषु पञ्चविंशतिप्रतिशतमितं शुल्कं स्थापयितुं घोषणां कृतवान्। अद्य ओटावा-नगरे वार्ताहरसम्मेलनं सम्बोधयन् ट्रूडो वर्य: मङ्गलवासरात् आरभ्य-त्रिंशत्-बिलियन-डालर-मितेषु अमेरिकादेशीय-आयातेषु पञ्चविंशत्यधिकैक-शत-बिलियन-डॉलरमितेषु अमेरिकादेशीय-वस्तुषु समानशुल्कं स्थापयितुम् उद्घोषितवान्।

चीनदेश: स्वीय आयातेषु दशप्रतिशतम् अतिरिक्त शुल्कं आरोपितार्थम् अमेरिकादेशस्य निर्णयस्य विरोधम् अकरोत्। चीनदेशेन कथितं यत् देश: स्वाधिकारणां हितानां च रक्षणार्थम् आवश्यकानि प्रतिकारोपायानि करिष्यति। इत: प्राक् मैक्सिकोदेशस्य राष्ट्रपति: क्लॉडिया शिनबॉम इत्येषा उक्तवती यत् तस्या: देश: अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्प इत्यनेन आरोपितस्य शुल्कस्य विरुद्धं प्रतिकारं करिष्यति।

बसन्त-पञ्चमी-

अशेषे हि देशे अद्य बसन्तपञ्चम्याः सरस्वतीपूजायाश्च पर्व हर्षोल्लासेन आमान्यते। अवसरेऽस्मिन् जनाः भगवत्याः श्रीसरस्वतीदेव्याः पूजनं कुर्वन्ति। बसन्तपञ्चम्याः इदं पर्व बसन्तागमनस्य नवऋतोः प्रकृतेः सौन्दर्यञ्च संसूचयति।

राष्ट्रपति-पदासीना द्रौपदी मुर्मुः एवं प्रधानमन्त्री नरेन्द्र मोदी च अवसरेऽस्मिन् देशवासिभ्यः शुभकामनां प्रकल्पितवन्तौ। एकस्मिन् सामाजिकान्तर्जालिक-सन्देशे राष्ट्रपतिना द्रौपदी-मुर्मुः इत्यनया ज्ञानदायकेऽस्मिन् पर्वणि याचितं यत् इदं पर्व देशवासिनां कृते ज्ञान-सुख-समृद्धिप्रदञ्च स्यात्।

अवसरेऽस्मिन् प्रधानमन्त्रिणा नरेन्द्र मोदिना अपि जनेभ्यः शुभकामनाः प्रदत्ताः

-

<u>क्रिकेट</u>

भारतेन मलेशियायाः कुआलालम्पुर-स्थले बायूमास-ओवल इत्यत्र निर्णायकस्पर्धायां दक्षिणाफ्रीका-दलं नवस्तोभैः पराजितम्।

।। इति वार्ताः।।